# Shri Ganeshastavanam by Valmiki

# વાલ્મીકિકૃતં શ્રીગણેશસ્તવનમ્ અથવા ગણેશાષ્ટકમ્

## Document Information

Text title : Ganeshastavanam by vAlmIki

File name : gaNeshastavanamvAlmIki.itx

Category : aShTaka, ganesha, stava

Location : doc_ganesha

Transliterated by : Jonathan Wiener wiener78 at sbcglobal.net

Proofread by : Jonathan Wiener, NA

Description-comments : gaNesharahasya ashok kumAr gauD

Latest update : July 6, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2025

*sanskritdocuments.org*

Shri Ganeshastavanam by Valmiki

# વાલ્મીકિકૃતં શ્રીગણેશસ્તવનમ્ અથવા ગણેશાષ્ટકમ્

ચતુઃષષ્ટિકોટ્યાખ્યવિદ્યાપ્રદં ત્વાં સુરાચાર્યવિદ્યાપ્રદાનાપદાનમ્ ।
કઠાભીષ્ટવિદ્યાર્પકં દન્તયુગ્મં કવિં બુદ્ધિનાથં કવીનાં નમામિ ॥ ૧॥

સ્વનાથં પ્રધાનં મહાવિઘ્નનાથં નિજેચ્છાવિસૃષ્ટાણ્ડવૃન્દેશનાથમ્ ।
પ્રભુ દક્ષિણાસ્યસ્ય વિદ્યાપ્રદં ત્વાં કવિં બુદ્ધિનાથં કવીનાં નમામિ ॥ ૨॥

વિભો વ્યાસશિષ્યાદિવિદ્યાવિશિષ્ટપ્રિયાનેકવિદ્યાપ્રદાતારમાદ્યમ્ ।
મહાશાક્તદીક્ષાગુરું શ્રેષ્ઠદં ત્વાં કવિં બુદ્ધિનાથં કવીનાં નમામિ ॥ ૩॥

વિધાત્રે ત્રયીમુખ્યવેદાંશ્ચ યોગં મહાવિષ્ણવે ચાગમાઞ્ શઙ્કરાય ।
દિશન્તં ચ સૂર્યાય વિદ્યારહસ્યં કવિં બુદ્ધિનાથં કવીનાં નમામિ ॥ ૪॥

મહાબુદ્ધિપુત્રાય ચૈકં પુરાણં દિશન્તં ગજાસ્યસ્ય માહાત્મ્યયુક્તમ્ ।
નિજજ્ઞાનશક્ત્યા સમેતં પુરાણં કવિં બુદ્ધિનાથં કવીનાં નમામિ ॥ ૫॥

ત્રયીશીર્ષસારં રુચાનેકમારં રમાબુદ્ધિદારં પરં બ્રહ્મપારમ્ ।
સુરસ્તોમકાયં ગણૌઘાધિનાથં કવિં બુદ્ધિનાથં કવીનાં નમામિ ॥ ૬॥

ચિદાનન્દરૂપં મુનિધ્યેયરૂપં ગુણાતીતમીશં સુરેશં ગણેશમ્ ।
ધરાનન્દલોકાદિવાસપ્રિયં ત્વાં કવિં બુદ્ધિનાથં કવીનાં નમામિ ॥ ૭॥

અનેકપ્રતારં સુરક્તાબ્જહારં પરં નિર્ગુણં વિશ્વસદ્બ્રહ્મરૂપમ્ ।
મહાવાક્યસન્દોહતાત્પર્યમૂર્તિં કવિં બુદ્ધિનાથં કવીનાં નમામિ ॥ ૮॥

ઇદં યે તુ કવ્યષ્ટકં ભક્તિયુક્તા-
ત્રિસન્ધ્યં પઠન્તે ગજાસ્યં સ્મરન્તઃ ।
કવિત્વં સુવાક્યાર્થમત્યદ્ભુતં તે
લભન્તે પ્રસાદાદ્ ગણેશસ્ય મુક્તિમ્ ॥ ૯॥

ઇતિ બ્રહ્મપુરાણે વાલ્મીકિકૃતં ગણેશસ્તવનં સમાપ્તમ્ ।
કવ્યષ્ટકમ્

Encoded and proofread by Jonathan Wiener wiener78 at sbcglobal.net

*Shri Ganeshastavanam by Valmiki*

pdf was typeset on May 11, 2025

Please send corrections to *sanskrit@cheerful.com*